# Skandaproktam Shivarahasyabhashah

# स्कन्दप्रोक्तं शिवरहस्याभाषः

## Document Information

Text title : Skandaproktah Shivarahasyabhashah

File name : shivarahasyAbhAShaHskandaproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 11 - jaigIShavyaskandasaMvAde dvAdashAMshasaNkhyAkathanam | 4-64||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# स्कन्दप्रोक्तं शिवरहस्याभाषः

- शिवरहस्ये जैगीषव्यस्कन्दसंवादे -
नमस्कृत्वाप्रमेयाय महादेवाय शम्भवे ।
देवीं गजाननं देवं शैवाचार्यानकल्मषान् ॥ ४॥

माहेशांशः प्रथमतो नाम्नासौ मुनिसत्तम ।
जेगीपव्य प्रसादन्ते महेशस्य समागमः ॥ ५॥

गणानान्देवसंङ्घाना मुनीनाञ्च समागमः ।
मया प्रसादितो देवस्स्तोत्रवर्यण सत्तम ॥ ६॥

कैलासवर्णनञ्चैव विचित्रं श्रीमहेशितुः ।
देव्या महेशसंवादः कौतुकेन नगोत्तमे ॥ ७॥

चरित्रं शिवयोस्तत्र विचित्रं भूधरोत्तमे ।
कैलासेश्वरपूजा च महेशेन प्रकल्पनम् ॥ ८॥

द्वारप्राकाररचना गणानां स्थानकल्पनम् ।
मम देव्याश्च विप्रेन्द्र गणेशस्य महात्मनः ॥ ९॥

सहस्रलिङ्गाध्यायञ्च कैलासस्य तपः क्रिया ।
तत्प्रसादनमीशेन तन्मौलौवसतिस्तथा ॥ १०॥

कैलासस्याभिषेकश्च शम्भुना कल्पितोनगैः ।
जिज्ञासा चैवदेवानान्देव्यःप्रादुर्भवात्सुराः ॥ ११॥

ज्ञानार्थकथनञ्चैव चात्मलिङ्गस्य पूजनम् ।
माहेशोऽस्मिन्महेशेनकथाःप्रोक्ताश्शिवेन हि ॥ १२॥

दिक्संख्यया मुनिश्रेष्ठ कथितोऽयं सहस्रतः ।
द्वितीयांशोभवोनास्नातस्मिन्प्रोक्तंहरेणहि ॥ १३॥

देव्याश्चैव तपश्चर्या मणिद्वीपागमस्तथा ।

कल्पवाटीरम्यनीपवनद्वीपोपवर्णनम् ॥ १४॥

चिन्तामणिमहासौधवर्णनं श्रीपुरस्यच ।
तस्मात्कैलासगमनं कामेशस्य वपुर्धरः ॥ १५॥

कामेशया च देव्याच तत्र नित्यमवस्थितिः ।
हिमाचलागमश्चैव देव्यास्तत्र गतिर्मुने ॥ १६॥

दूर्वाससोमहिम्नश्च कथनं तत्तपःक्रिया ।
द्वितीये भवसञ्ज्ञेऽत्र कथितं शङ्करेणहि ॥ १७॥

सहस्रत्रितयेनैव श्लोकसार्धेन शङ्करः ।
(श्लोकसार्धेन साहस्रत्रितयेनैव शङ्करः) ।
हरस्त्रितीयो देवेन कथितोंशो मुनीश्वराः ॥ १८॥

तस्मिन्मुनिप्रार्थनया व्यासेनपरिकीर्तनम् ।
गायत्रयाश्च तपश्चर्या देव्यागमनमुत्तमम् ॥ १९॥

गणानाम्प्रेषणश्चैच तीर्थेशमहिमा तथा ।
श्रीशैलमहिमा चापि मानसार्चनकल्पनम् ॥ २०॥

जनकस्य च संवादो याज्ञवल्क्येन शङ्करः ।
पद्मावत्या रत्ननिधेस्संवादः परमाद्भुतः ॥ २१॥

तस्पोत्तरार्धेचांशस्य पूजारत्ननिधेस्तथा ।
शिवस्य देवदेवस्य महादेवस्य शूलिनः ॥ २२॥

यमलोकस्य वृत्तान्तो देशनं शिवयोस्तथा ।
संवादो भस्मरुद्राक्षधारणे महिमापि च ॥ २३॥

गङ्गाया नर्मदायाश्च वरप्राप्त्युपवर्णनम् ।
माहेश्वरव्रतश्चैव वर्णनं श्रीमहेशितुः ॥ २४॥

शैवार्चनादिकथनं शिवढुण्ढिचरित्रकम् ।
त्रयस्त्रिंशत्सहस्रेण सङ्ख्या प्रोक्त एवहि ॥ २५॥

चतुर्थश्शिवसञ्ज्ञोहि चांशस्साक्षाच्छिवोदितः ।
बृहज्जाबालधर्मादिकिथनं दशकस्य हि ॥ २६॥

भस्मरुद्राक्षमहिमा शिवलिङ्गार्चनस्य च ।
महिमा शिवभक्तानां शैवानां भोजनेऽपिच ॥ २७॥

शिवक्षेत्रनिवासस्य कथनं बिल्वपूजनात् ।
पूजाप्रभावकथनं तस्मिन्नंशे प्रकीर्तितम् ॥ २८॥

चतुस्सहस्रतस्सङ्ख्या देवदेवोदिता शुभा ।
भर्गोनाम्ना पञ्चमांशः कथितोऽत्रशिवेनहि ॥ २९॥

ज्योतिर्लिङ्गद्वादशानां महिमा तत्र कीर्तितः ।
वामदेवोपदेशश्च श्रुतिसिद्धान्त कीतेनम् ॥ ३०॥

गङ्गासागरमाहात्म्यं प्रभासे पुष्करस्यच ।
हरिद्वारप्रभावश्च बिल्वमूलार्चनस्य च ॥ ३१॥

सहस्रनामकथनन्देवदेवस्य शूलिनः ।
महिमा देवदेवेन कथितोऽस्ति विशेषतः ॥ ३२॥

शिवायैषद्वहस्रोऽत्र कथितो मुनिसत्तम ।
शङ्करांशास्ततष्षष्ठो दिक्सङ्ख्या क्रमसङ्ख्यया ॥ ३३॥

कथितश्श्रीमहेशेन तस्मिन्रुद्रोपवर्णनम् ।
शिवलिङ्गार्चनस्यापि भस्सरुद्राक्षधारिणाम् ॥ ३४॥

महिमा शाम्भवानाञ्च कथितो विस्तरेणहि ।
निदाघऋभुसंवादष्षष्ठांशो ज्ञानविस्तर ॥ ३५॥

उग्रो नाम्ना सप्तमोऽत्र कथितश्शंकरेण हि ।
देवस्य देव्या संवादो नामसाहस्रकीर्तनम् ॥ ३६॥

अविमुक्तप्रशंसा च शतर्चनतपःक्रिया ।
नाम्नामष्टोत्तराख्यानं महिन्नमथवेहरेः ॥ ३७॥

पुष्पदन्तमहिम्नाख्यकथनं तत्र सत्तम ।
काटकोटरजाख्यानं क्षेत्राणां महिमा तथा ॥ ३८॥

श्रीशैलस्यारुणाद्रेश्च तथावृद्धाचलस्यच ।
श्रीभीमद्दक्षिणकैलासमाहात्म्यपि विस्तरात् ॥ ३९॥

पुण्डरीकपुरस्यापि काञ्चयाश्श्रीमहिमाद्भुतः ।
कुम्भघोणप्रशंसाचतथामध्यार्जुनस्य च ॥ ४०॥

चतुर्दशसहस्रेण कथितोऽत्रशिवेनहि ।

भीमोऽष्टमोमहांशोऽत्रकथितोविस्तरेणहि ॥ ४१॥

दिङ्नागसङ्ख्यया चैव सहस्रेण मुनीश्वर ।
पाताललोकलिङ्गानां महिमाकथनम्मुने ॥ ४२॥

श्रीहाटकेशमहिमा शेषस्यातत्रतपःक्रिया ।
प्रसादश्च महेशेन तस्य भूभारधारणे ॥ ४३॥

सदाशिवोंशो नवमस्तस्मिञ्छम्भोःकथानम् ।
शिवेनोक्तं महादेव्यै नामसाहस्रमुत्तमम् ॥ ४४॥

कलौ शैवसमाचारप्रमाणेन विमुक्तिदम् ।
ईश्वरांशोऽत्र दशमो दशधर्मानुकीर्तनम् ॥ ४५॥

बिल्वार्चनं रुद्रजपः पञ्चाक्षरमहोदयः ।
शिवलिङ्गार्चनस्यापि भस्मरुद्राक्षकीर्तनम् ॥ ४६॥

शाम्भवानां शिवक्षेत्रेशैवभक्तार्चनन्तथा ।
शिवनाम्नस्स्मृतेश्चापि दशमे महिमातु यः ॥ ४७॥

तस्मिन्प्रकीर्तितोविप्रशङ्करस्याख्यसङ्ख्यया ।
एकादशो महादेवः प्रोक्तोंशश्शम्भुनातदा ॥ ४८॥

मन्त्रेत्रक्रमसङ्ख्यातश्शिवपूजाक्रमात्मकः ।
अभिषेचनिकानाञ्च फलं पुष्पेषुकीर्तनम् ॥ ४९॥

भक्तीनान्दशकानाञ्च कीर्तनं पूजने तथा ।
मुनिसङ्ख्यया ग्रन्थतश्च ईशो नाम्नात्र द्वादशः ॥ ५०॥

शिवनाम्नां सहस्रस्य कीर्तनं तत्र कीर्तितम् ।
प्रसादशंकरस्यापि ममैवानुग्रहात्मकः ॥ ५१॥

शिवरत्नाकरकथामाहात्म्यं मुनितोषणम् ।
एतदध्यायसाहस्रैः कीर्तितं श्रीशिवेन हि ॥ ५२॥

देव्यै देवेन कथितं रहस्यं शिवसम्मतम् ।
सदाशिवसमो देवो नास्ति लोकत्रयेष्वपि ॥ ५३॥

तथा शिवरहस्येन तुल्यमन्यन्नविद्यते ।
शैवसारमहारत्नरकोशोऽयं मुनिसत्तम ॥ ५५॥

पुण्योऽयं पावनश्चायं भक्तिसारकथाश्रयः ।
संसारायासधर्माणां कथनेन विवर्जितम् ॥ ५६॥

वर्णाश्रमविचारादिकथाश्रमविवर्जितः ।
अत्याश्रमोक्तधर्माणामाकरोऽयं महामुने ॥ ५७॥

नानाकथासुधाश्शैवाः परमानन्दनिर्भराः ।
देव्यै देवेन कथिताश्शतसाहस्रतोऽधिकाः ॥ ५८॥

भक्तैश्श्राव्योऽयमतुलश्चेतिहासवरोत्तमः ।
शैवसारकथारत्नं सर्वस्वोऽयं मुनीश्वराः ॥ ५९॥

स्कन्दे गजानने गौर्यां यथाप्रीतिर्महेशितु ।
तथा शिवरहस्येऽपि गोप्यं गोप्यमिदं शुभम् ॥ ६०॥

नदेयं नैव वक्तव्यमादौ तेभ्यस्त्वया मुने ।
शप मत्पदयोर्विप्र नचेन्मूर्धाद्य ते पतेत् ॥ ६१॥

वेदान्तसारसर्वस्वं शिवभक्तिप्रकाशकम् ।
देयं भक्ताय विप्राय पुत्रायात्यन्तरागिणे ॥ ६२॥

वक्तव्यमनहंकारचित्तायात्मगुणाय च ।
शैवाय शम्भोरुत्कर्षभक्तियुक्ताय ते मुने ॥ ६३॥

संवत्सरोषितायत्वं भक्तायान्तेनिवासिने ।
त्रिणेत्रचिन्तापात्राय नान्यस्मै सत्यमुच्यते ॥ ६४॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये स्कन्दप्रोक्तं शिवरहस्याभाषः ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ११ - जैगीषव्यस्कन्दसंवादे द्वादशांशसङ्ख्याकथनम् । ४-६४॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 11 - jaigIShavyaskandasaMvAde dvAdashAMshasankhyAkathanam . 4-64..

Notes:

Skanda स्कन्द details to Jaigīṣavya जैगीषव्य about the contents of the Text of the Śiva-Rahasyam शिवरहस्यम् that comprises of Twelve Sections - Dvādaśāṁśa द्वादशांश that are named sequentially as Māheśaḥ माहेशः, Bhavaḥ भवः, Haraḥ हरः, Śivaḥ शिवः,

Bhargaḥ भर्गः, Śaṅkaraḥ शङ्करः, Ugraḥ उग्रः, Bhīmaḥ भीमः, Sadāśivaḥ सदाशिवः, Īśvara ईश्वर, Mahādevaḥ महादेवः and Īśaḥ ईशः.

Encoded and proofread by Ruma Dewan

*Skandaproktam Shivarahasyabhashah*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*